## ऋगवेदसंहिता १ - ५०

## Ṛig Veda 1:50

प्रस्कण्वः काण्वः । । सूर्यः । १ ६-निचृद्गायत्री । २ ४ ८ ९-पिपीलिकामध्यानिचृद्गायत्री । ३- गायत्री । ५-यवमध्याविराड्गायत्री । ७-विराड्गायत्री । १० ११-निचृदनुष्टुप् । १२ १३-अनुष्टुप् ॥

The **Ṛishi** is Praskaṇva son of Kaṇva, the **Devatā** is Sūrya, the **Chhandas** of verses 1-9 is Gāyatrī, of verses 10-13, Anushṭubh.

उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ १ ॥

1. His coursers bear on high the divine all-knowing SŪRYA, that he may be seen by all (the worlds).

अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ।
सूराय विश्वचक्षसे ॥ २ ॥

2. (At the approach) of the all-illuminating Sun, the Nakshatras depart, with the night, like thieves.

अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु ।
भ्राजन्तो अग्नयो यथा ॥ ३ ॥

3. His illuminating rays behold men in succession, like blazing fires.

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
विश्वमा भासि रोचनम् ॥ ४ ॥

4. Thou, SŪRYA, outstrippest all in speed, thou art visible to all, thou art the source of light, thou shinest throughout the entire firmament.

प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान् ।
प्रत्यङ्विश्वं स्वर्दृशे ॥ ५ ॥

5. Thou risest in the presence of the MARUTS, thou risest in the presence of mankind, and so as to be seen in the presence of the whole (region) of heaven.

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥ ६ ॥

6. With that light with which thou, Varuṇa, lookest upon this creature-bearing world.

वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः ।
पश्यञ्जन्मानि सूर्य ॥ ७ ॥

7. Thou SŪRYA, traversest the vast ethereal space, measuring days and nights, and contemplating all that have birth.

सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
शोचिष्केशं विचक्षण ॥ ८ ॥

8. Divine and light-diffusing SŪRYA, thy seven coursers bear thee, bright-haired, in thy car.

अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः ।
ताभिर्याति स्वयुक्तिभिः ॥ ९ ॥

9. SŪRYA has yoked the seven mares that safely draw his chariot and comes with them self-harnessed.

उद्व॒यं तम॑स॒स्परि॒ ज्योति॒ष्पश्य॑न्त॒ उत्त॑रम् ।
दे॒वं दे॑व॒त्रा सूर्य॒मग॑न्म॒ ज्योति॑रुत्त॒मम् ॥ १० ॥
उ॒द्यन्न॒द्य मि॑त्रमह आ॒रोह॒न्नुत्त॑रां॒ दिव॑म् ।
हृ॒द्रो॒गं मम॑ सूर्य हरि॒माणं॑ च नाशय ॥ ११ ॥
शु॒के॑षु मे हरि॒माणं॑ रोप॒णाका॑सु दध्मसि ।
अथो॑ हारिद्र॒वेषु॑ मे हरि॒माणं॒ नि द॑ध्मसि ॥ १२ ॥
उद॑गाद॒यमा॑दि॒त्यो विश्वे॑न॒ सह॑सा स॒ह ।
द्वि॒षन्तं॒ मह्यं॑ र॒न्धय॒न्मो अ॒हं द्वि॑ष॒ते र॑धम् ॥ १३ ॥

10. Beholding the up-springing light above the darkness, we approach SŪRYA, among the gods, the excellent light.

11. Radiant with benevolent light, rising to-day, and mounting into the highest heaven, do thou, SŪRYA, remove the sickness of my heart, and the yellowness (of my body).

12. Let us transfer the yellowness (of my body) to the parrots, to the starlings, to the Haritāla tree.

13. This ĀDITYA has risen, with all (his) might, destroying my adversary, for I am unable to resist my enemy.